# MP BOARD CLASS 9 EXAM 2015

## संस्कृत (सामान्य) : कक्षा IX

प्रश्न १. उचितविकल्पं चित्वा लिखत— ५

(i) 'सदाचारः' इत्यस्मिन् पदे सन्धिः अस्ति—
(अ) स्वर सन्धिः (ब) व्यञ्जन सन्धिः (स) विसर्ग सन्धिः (द) यण् सन्धिः।

(ii) विसर्ग सन्धेः उदाहरणम् अस्ति—
(अ) नमस्ते (ब) सुबन्तः (स) अत्याचारः (द) जगदीशः।

(iii) महा + ईशः ··············· भवति।
(अ) महीशः (ब) महेशः (स) महैशः (द) महाईशः।

(iv) 'स्वागतम्' इत्यस्य पदच्छेदः भवियति—
(अ) सु + आगतम् (ब) स्वा : गतम् (स) स्वा + आगतम् (द) स्वाग + तम्।

(v) अधोलिखितेषु अव्ययं नास्ति—
(अ) तत्र (ब) सर्वत्र (स) रमा (द) तदा।

प्रश्न २. उचितविकल्पं चित्वा लिखत— ५

(i) कर्मधारय समासस्य उदाहरणं अस्ति—
(अ) ग्रामगतः (ब) महापुरुषः (स) दशाननः (द) अनुरूपम्।

(ii) 'पञ्चवटी' इत्यस्मिन् पदे समासः अस्ति—
(अ) द्वन्द्वसमासः (ब) बहुव्रीहिसमासः (स) द्विगुसमासः (द) तत्पुरुषसमासः।

(iii) 'यथाशक्ति' इत्यस्मिन् पदे समासः अस्ति—
(अ) अव्ययीभावः समासः (ब) द्विगुः समासः
(स) कर्मधारयः समासः (द) द्वन्द्वः समासः।

(iv) 'पराजय' इत्यस्मिन् पदे उपसर्गः अस्ति—
(अ) परा (ब) जय (स) पर (द) राज।

(v) अधोलिखितेषु उपसर्गः अस्ति—
(अ) निस् (ब) पठ् (स) वद् (द) कथ्।

प्रश्न ३. उचितविकल्पं चित्वा लिखत— ५

(i) 'अयाचत्' इत्यस्मिन् पदे लकारः अस्ति—
(अ) लोट्लकारः (ब) लङ्लकारः (स) लट्लकारः (द) लृट्लकारः।

(ii) 'भविष्यामि' इत्यस्मिन पदे पुरुषः अस्ति—
(अ) उत्तम पुरुषः (ब) प्रथम पुरुषः (स) मध्यम पुरुषः।

(iii) 'पठति' इत्यस्मिन् पदे धातुः अस्ति—
(अ) पच् (ब) पा (स) पत् (द) पठ्।

(iv) 'गच्छेताम् इत्यस्मिन् पदे वचनं अस्ति—
(अ) एकवचनम् (ब) बहुवचनम् (स) द्विवचनम्।

(v) 'सदाचारः एव परमोधर्मः अस्मिन् वाक्ये अव्ययम् अस्ति—
(स) सदाचारः (ब) एव (स) परमः (द) धर्मः।

प्रश्न ४. उचितविकल्पं चित्वा लिखत— ५

(i) 'क्त्वा' प्रत्ययस्य उदाहरणं अस्ति—
(अ) गतः (ब) गत्वा (स) आगत्य (द) गमनीय।

(ii) 'पठ् + तुमुन्' ··············· भवति।
(अ) पठन् (ब) पठतः (स) पठितुम् (द) पठितवान्।

(iii) 'सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(अ) तुमुन् (ब) शानच् (स) शतृ (द) क्त।

(iv) 'प्रदाय' इत्यस्मिन् पदे प्रत्ययं अस्ति—
(अ) क्तवतु (ब) तमप् (स) टाप् (द) ल्यप्।

(v) स्वाध्यायान्मा ··············· ।
(अ) प्रमदः (ब) सम्वादः।

प्रश्न ५. प्रदत्तशब्दैः रिक्तस्थानपूर्ति करणीया— ५

*(जयसिंहेन, सत्यश्रमाभ्याम्, पुत्र इति, प्रतिष्ठाम्, रक्षति)*

(i) कोऽपि पुरुषः मां ··············· आलिङ्गति।

(ii) राजा ··············· वेधशालानिर्माणं कारितम्।

https://www.evidyarthi.in/

(iii) मा! निषाद ............... त्वमागम: शाश्वती: समा:।

(iv) गृध्र: पक्षिशावकान् ............... ।

(v) ............... सकलार्थ: सिद्धि:।

**प्रश्न ६. अधोलिखितेषु प्रश्नेषु त्रयाणाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत—** ६

(i) पञ्चतन्त्रस्य रचनाकार क: ?

(ii) घट: कै: सम्पूरित: ?

(iii) केषां सङ्ग करणीय: ?

(iv) सीता लक्ष्मणश्च केन सह वनम् अगच्छताम् ?

(v) राज्ञा स्मृति: कथम् उपलब्धा ?

**प्रश्न ७. अधोलिखितेषु द्वयो: शब्दयो: रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—** २

(i) राम—तृतीया विभक्ति:

(ii) फल—पञ्चमी विभक्ति:

(iii) पितृ—प्रथमा विभक्ति:

(iv) रमा—द्वितीया विभक्ति:।

**प्रश्न ८. अधोलिखितेषु द्वयो: शब्दयो: रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—** २

(i) तत्—स्त्रीलिङ्ग—तृतीया विभक्ति:

(ii) अस्मद्—प्रथमा विभक्ति:

(iii) युष्मद्—पञ्चमी विभक्ति:

(iv) किम् (नपुंसकलिङ्ग)—द्वितीया विभक्ति:।

**प्रश्न ९. अधोलिखितेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत—** १०

(i) **उत्तरमुखे आनन्दतत्त्वस्य व्यञ्जना विद्यते। अस्मिन् भगवान विजयामत्त अट्टहासं कुर्वन इव प्रतिभाति। अत्र कपोलौ उत्फुल्लौ, अधरोष्ठौ, स्फुटौ, नेत्रे निमीलिते, शिथिला: विकीर्णा मूर्धजा: च सुस्पष्टं दृश्यन्ते। अर्धनिर्मितेषु अधोऽङ्कित्तेषु मुखेषु प्रथमे विद्यार्थिभाव द्वितीये धर्मार्थिभाव: तृतीये उद्योगार्थिभाव: चतुर्थे च अर्थार्थिभाव: च विद्भि: सम्भाव्यन्ते।**

**प्रश्ना:—** (अ) उत्तरमुखे कस्य तत्त्वस्य व्यञ्जना विद्यते ?

(ब) भगवान किम् कुर्वन् प्रतिभाति ?

(स) अस्य प्रथमे मुखे क: भाव ?

(द) अस्य द्वितीये मुखे क: भाव ?

(इ) अस्य चतुर्थे मुखे क: भाव: ?

(ii) **उज्जयिनी भारतस्य अत्यन्तं प्राचीनम् इतिहास-धर्म-दर्शन-कला-साहित्य-योग-ज्यौतिषादीनां च केन्द्रमासीत्।**
**एषा अवन्तिका, विशाला नाम्नापि शास्त्रेषु वर्णिता अस्ति।**
**अत्र सर्वत्र पुरातात्विकं वैभवं दृष्ट्वा मनसि आनन्दो जायते। भगवत: महाकालस्य पुरीयं देशे श्रद्धाया: केन्द्रमस्ति।**

**प्रश्ना:—** (अ) उज्जयिनी भारतस्य कस्या: विद्याया: प्रमुखं केन्द्रमासीत् ?

(ब) एषा शास्त्रेषु केन नाम्नापि वर्णिता अस्ति ?

(स) किम् दृष्ट्वा मनसि आनन्दो जायते ?

(द) श्रद्धाया: केन्द्रं का ?

(इ) 'दृष्ट्वा' इत्यस्मिन् पदे क: प्रत्यय: अस्ति ?

(iii) **एवं विश्वास्य स मार्जारस्तरुकोटरे स्थित:। ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तै: शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जार: कोटरान्नि:सृत्य बहि: पलायित:। पश्चात्पक्षिभिरितस्ततो निरूपयद्भि: तत्र तरु कोटरे शावकास्थीनि प्राप्तानि।**

**प्रश्ना :—** (अ) मार्जार: कुत्र स्थित ?

(ब) मार्जार: कान् प्रत्यहं खादति ?

(स) क: बहि: पलायित: ?

https://www.evidyarthi.in/

(द) शावकास्थीनि कुत्र प्राप्तानि?
(इ) 'कोटरे' इत्यस्मिन् पदे क: विभक्ति: अस्ति?

प्रश्न १०. अधोलिखितेषु पद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायाम् देयानि— १०

(i) **पापान्निवारयति योजयते हिताय,**
**गुह्यं निगूहति गुणान्प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्त:॥**

प्रश्ना:— (अ) सन्मित्रं पापात् किं करोति?
(ब) सन्मित्रं हिताय किं करोति?
(स) सन्मित्रं गुणान् किं करोति?
(द) सन्मित्रं आपदगतं किं करोति?
(इ) सन्मित्रलक्षणमिदं के प्रवदन्ति?

(ii) **बुद्धे: फलं तत्त्वविचारणा च,**
**देहस्य सारं व्रतधारणं च।**
**अर्थस्य सारं किल पात्रदानम्,**
**वाच: फलं प्रीतिकरं नराणाम्॥**

प्रश्ना:— (अ) बुद्धे: फलं का अस्ति?
(ब) देहस्य सारं किम्?
(स) कस्य सारं पात्रदानम्?
(द) वाच: फलं किं?
(इ) "नराणाम्" पदे का विभक्ति: अस्ति ?

(iii) **चित्रकूटं गते रामे पुत्रशोकातुरस्तदा।**
**राजा दशरथ: स्वर्गं जगाम विलपन् सुतम्॥**

प्रश्ना:— (अ) क: चित्रकूटं गत:?
(ब) पुत्रशोकातुर: क: अभवत्?
(स) सुतार्थं क: अविलपत्?
(द) क: स्वर्गं जगाम?
(इ) 'शोकातुर:' इति पदस्य सन्धिविच्छेद: कृत्वा लिखत।

प्रश्न ११. अधोलिखितानां युग्ममेलनं कुरुत (केचित् चत्वार:)— ४

(i) तमसा (अ) भाषणम्
(ii) कविता (ब) सीताराम:
(iii) शुकवद् (स) नदी
(iv) कृषका: (द) कालिदास:
(v) मुनिशुक: (इ) कृषिकार्यम्

प्रश्न १२. शुद्धानां वाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत (केचित् चत्वार:)— ४

(i) दुर्जने विश्वास: करणीय:।
(ii) कैकेय्या: प्रियकारणात् राम: वनं गत:।
(iii) गात्रम् अङ्केन विना शोभते।
(iv) वाल्मीकि: आदिकवि: अस्ति।
(v) बाल: सिंहशावकेन सह क्रीडति।

प्रश्न १३. निम्नलिखित चतुर्णां प्रश्नानां उत्तराणि संस्कृतभाषायाम् एकपदेन देयानि— ४

(i) ध्यानं कथम् आचरेत्? (ii) गीताया: गाता क:?
(iii) ऋषिजनेन बालस्य नाम किं कृतम्? (iv) श्रवण: जलार्थं कुत्र गत:?
(v) वीरबालाया: नाम किम्?

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय पाठ्यपुस्तकात् कंठस्थीकृतम् सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वस्य प्राचार्यस्य कृते दिवसत्रयस्य अवकाशप्रार्थनापत्रं संस्कृते लिखत। ४

*अथवा*

स्वमित्राय निमन्त्रणपत्रम् संस्कृते लिखत।

https://www.evidyarthi.in/

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्ध कारकवाक्यानां शुद्धिः करणीया— ५

(i) अहम् लेखिन्यां पत्रम् लिखामि। (ii) शिवम् नमः।
(iii) बालकः अश्वेन पतति। (iv) रमेशः जलः पिबति।
(v) सः नृपेन सेवकः अस्ति। (vi) पर्वताय मृगाः सन्ति।
(vii) हिमालयं गङ्गा उद्भवति।

प्रश्न १७. अधोलिखि वाक्यानां क्रमसंयोजनं कुरुत— ५

(i) एवं शुकयोः भिन्न व्यवहारं दृष्ट्वा ऋषिः आश्चर्यसागरे निमग्नः।
(ii) कश्चित् एकः महान् तपस्वी ऋषिः आसीत्।
(iii) संसर्गजा दोषगुणाः भवन्ति।
(iv) सः शुकः ऋषिं दृष्ट्वा "मारयतु कुट्टयतु" इति अपरं च "सीताराम-सीताराम" इति उक्तवान्।
(v) सः लोककल्याणर्थम् अहर्निशं भूतले भ्रमति स्म।

प्रश्न १८. अधोलिखितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत— ५

**विद्या सर्वेषां धनानां श्रेष्ठम् धनमस्ति। तेन एव मनुष्यो भवति अन्यथा विद्यारहितो पशुः अस्ति। इदं धनम् चौरश्चोरयितुं बान्धवाश्च विभाजयितुं न शक्नुवन्ति। व्यये कृते इदं धनं सर्वदा वर्धते एव। विदेशगमने विद्या परम सहायिका भवति।**

प्रश्नाः— (i) उपर्युक्तगद्यांशस्य उचितशीर्षकं लिखत।
(ii) कः धनम् श्रेष्ठं अस्ति?
(iii) विद्यारहितो मनुष्यः कः अस्ति?
(iv) व्यये कृते किं वर्धति?
(v) विदेशगमने का सहायिका भवति?

प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृते निबन्धं लिखत— १०

(i) पुस्तकम्, (ii) मम पाठशाला, (iii) उद्यानम्,
(iv) विद्या, (v) धेनुः।

## उत्तर

| | | | | | |
|---|---|---|---|---|---|
| १. | (i) (ब), | (ii) (अ), | (iii) (ब), | (iv) (अ), | (v) (स)। |
| २. | (i) (ब), | (ii) (स), | (iii) (अ), | (iv) (अ), | (v) (अ)। |
| ३. | (i) (ब), | (ii) (अ), | (iii) (द), | (iv) (स), | (v) (ब)। |
| ४. | (i) (ब), | (ii) (स), | (iii) (ब), | (iv) (द), | (v) (अ)। |
| ५. | (i) पुत्र इति, | (ii) जयसिंहेन, | (iii) प्रतिष्ठाम्, | (iv) रक्षति, | (v) सत्यश्रमाभ्याम्। |
| ७. | (i) रामेण | रामाभ्याम् | रामैः। | | |
| | (ii) फलात् | फलेभ्याम् | फलेभ्यः। | | |
| | (iii) पिता | पितरौ | पितरः। | | |
| | (iv) रमाम् | रमे | रमाः। | | |
| ८. | (i) तया | ताभ्याम् | ताभिः। | | |
| | (ii) अहम् | आवाम् | वयम्। | | |
| | (iii) त्वत् | युवाभ्याम् | युष्मत्। | | |
| | (iv) किम् | के | कानि। | | |
| ११. | (i) → (स), | (ii) → (द), | (iii) → (अ), | (iv) → (इ), | (v) → (ब)। |
| १२. | (i) न, | (ii) आम्, | (iii) न, | (iv) आम्, | (v) आम्। |
| १३. | (i) बकवत्, | (ii) कृष्णः, | (iii) सर्वदमनः, | (iv) तमसातीरम्, | (v) चम्पा। |

१७. (ii) → (v) → (iv) → (i) → (iii)।

https://www.evidyarthi.in/